सद्भिः शुभग्रहैः। सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्वशिष्ठः "अथातः सम्प्रवक्ष्यामि सूतिकागारवेशनम्। मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसमये काले सद्य एव प्रवेशयेत्" इति। पूर्वपक्षे शुक्लपक्षे नक्षत्रादीन्याह गर्गः "रोहिण्यैन्द्रवपौष्णेषु स्वातीवारुणयोरपि। पुष्ये पुनर्वसौ हस्तधनिष्ठात्र्युत्तरासु च" इति। "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम्। सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषडायगाः। शुभांशे शुभसंदृष्टौ सूतिकागारवेशनमिति"।

तदाकारमाह भावप्र० "अष्टहस्तायतं चारु चतुर्हस्तविशालकम्। प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम्"।

**सूतिकारोग** पु० ६त०। भावप्र० उक्ते रोगभेदे तन्निदानादि यथा "मिथ्योपचारात् संक्लेशात् विषमाजीर्णभोजनात्। सूतिकायास्तु ये रोगा जायन्ते दारुणास्तु ते"। मिथ्योपचारात् अनुचिताचरणात् प्रवातादिसेवनात्। संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनकमन्नं तस्मात्। दारुणाः कष्टसाध्याः। के ते व्याधय इत्याकाङ्क्षायामाह "अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता। शोथः शूलातिसारौ च सूतिकारोगलक्षणम्। एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते। ज्वरादीनां रोगविशेषाणां निदानविशेषमाह "ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः। तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः। कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः। ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः" सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः आश्रयाश्रितयोरभेदोपचारात् ते चाप्युपद्रवा इति त एव ज्वरादयः उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च"।

**सूतिकाषष्ठी** स्त्री सूतिकागृहे पूज्या षष्ठी शाक०। सूतिकागारे प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम्। यथाह "विष्णुधर्मोत्तरे "सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता। षष्ठेऽह्नि रात्रियागन्तु जन्मदानाञ्च कारयेत्। रक्षणीया सदा षष्ठी निशां तत्र विशेषतः। राम! जागरणं कार्य्यं जन्मदानां तथा बलिः"। रामेति सम्बोधनम्। तत्राशौचान्तरदोषोऽपि नास्ति। "अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचाद्विशुध्यति" इति प्रजापतिवचनात्। पुत्रजन्मेति श्रवणात् पितुरेवाशौचाभावः न तु मातुः कर्त्तुरिति पुंलिङ्गनिर्देशाच्च। कारयेदिति अन्यगोत्रजाभिप्रायेण। तत्रादौ विनायकादिसहितषोडशमातृकापूजनम्। तथा च कृत्यचिन्तामणौ "छागजागरणं कार्य्यं खड्गो धार्य्यः समीपतः। आवाह्य पूजयेद्देवीं गणेशं मातृका गिरिम्"। देवीं षष्ठीम्। गिरिं मन्थानदण्डम्। भोजराजः "गणेशस्यैव नन्दा च पूतना मुखमण्डिका। विडालिका शकुनिका शुष्कनन्दा च जृम्भिका। आचार्य्यका रेवती च पिलिपिञ्जा ततः परम्। स्कन्दा च द्वादशैतेऽर्च्याः रक्षार्थं मातृका ग्रहाः" ज्यो०त०। [अमरः।

**सूत्थान** त्रि० सुष्ठु उत्थानम् उद्योगो यस्य। चतुरे कर्मकुशले

**सूत्पर** न० सु+उत्+पॄ—अप्। सुरासन्धाने शब्दच०।

**सूत्या** स्त्री सू-क्यप् नि०। यज्ञाङ्गस्नानभेदे २अभिषवे सोमरसनिष्पीड़ने च अमरः।

**सूत्याशौच** न० सूतिनिमित्तकमाशौचम्। जननाशौचे "शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते" स्मृतिः।

**सूत्र** ग्रन्थने वेष्टने च अद०चु०उभ०सक०सेट्। सूत्रयति ते असुसूत्रत् त। वक्तृचकत्वात् न षोपदेशः।

**सूत्र** न० सूत्र-अच्। १वस्त्रसाधने तन्तौ २व्यवस्थायां ३नाटकोपकरणे प्रस्तावे "स्वल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" इत्युक्ते शास्त्रवाक्यभेदे च।

**सूत्रकण्ठ** पु० सूत्रं यज्ञसूत्रं तदिव वा कण्ठे यस्य। १विप्रे २कपोते ३खञ्जरीटे च मेदि०। [तत्रार्थे त्रिका०।

**सूत्रकोण** पु० सूत्रबद्धः कोणोऽस्य। डमरौ हारा० कप्।

**सूत्रगण्डिका** स्त्री सूत्रं गण्डयति गण्डि-ण्वुल्। तन्तुवायोपकरणभेदे एषण्यां शब्दमा०।

**सूत्रतन्तु** पु० सूत्रमेव तन्तुः। सूत्राकारे तन्तौ हेमच०।

**सूत्रतर्कुटी** स्त्री सूत्रसहिता तर्कुटी। (टेको) पदार्थे जटा०

**सूत्रधार** पु० सूत्रं नाट्यसाधनं धारयति धृ-णिच्-अण्। नाट्याङ्गसाधनयुक्ते नाटकप्रस्तावके १प्रधाननटे। "नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः" इति तल्लक्षणं "पूर्वरङ्गं विधायैव सूत्रधारो निवर्त्तते" सा० द०। "सूत्रधारेण सहिताः संलापं यत्र कुर्वते" दशरूपकम्। २इन्द्रे ३शिल्पिभेदे (छुतार) च। शिल्पभेदस्त्रधारस्य शूद्रागर्भे विश्वकर्मणा जातो जातिभेदः ब्रह्मवै०ब्रह्मख०१०अ०।

**सूत्रपुष्प** पु० सूत्रगर्भं पुष्पं यस्य। कार्पासे त्रिका०।